यद्बाहूनभृत रणकण्डूपरवशान्॥ शिरःपद्मश्रेणीरचितचर
णाम्भोरुहबलेः स्थिरायास्त्वद्भक्तेस्त्रिपुरहरविस्फूर्जित
1 मिदम्॥११॥ अमुष्यत्वत्सेवासमधिगतसारं भुजवनं बलात्कै
लासेऽपि त्वदधिवसतौ विक्रमयतः॥ अलभ्यापातालेऽप्यलस ॥३॥
॥३॥ चलिताङ्गुष्ठशिरसि प्रतिष्ठात्वय्यासीद्ध्रुवमुपचितो मुह्यति ख
लः॥१२॥ यदृद्धिं सुत्राम्णो वरद परमोच्चैरपि सतीमधश्चक्रे बा
णः परिजनविधेयत्रिभुवनः॥ न तच्चित्रं तस्मिन्वरिवसि
तरि त्वच्चरणयोर्न कस्याप्युन्नत्यै भवति शिरसस्त्वय्यवनतिः
॥१३॥ अकाण्डब्रह्माण्डक्षयचकितदेवासुरकृपाविधेयस्या

भ्रूप्रणिहितां न हि स्वात्मारामं विषयमृगतृष्णा भ्रमयति ॥८॥
ध्रुवं कश्चित्सर्वं सकलमपरस्त्वध्रुवमिदं परो ध्रौव्याध्रौव्ये
जगति गदति व्यस्तविषये। समस्तेप्येतस्मिन् पुरमथन तै
र्विस्मित इव स्तुवन् जिह्रेमि त्वां न खलु ननु धृष्टा मुखरता॥
॥९॥ तवैश्वर्यं यत्नाद्यदुपरि विरिञ्चिर्हरिरधः परिच्छेत्तुं यातावन
लमनिलस्कन्धवपुषः॥ ततो भक्तिश्रद्धाभरगुरुगृण
द्भ्यां गिरिश यत्स्वयं तस्थे ताभ्यां तव किमनुवृत्तिर्न फलति।
॥१०॥ अयत्नादासाद्य त्रिभुवनमवैरव्यतिकरं दशास्यो

णितफेनोद्गमरुचिः प्रवाहो वारां यः पृषतलघुदृष्टः शिरसि ते ॥ ज
गद्वीपाकारं जलधिवलयं तेन कृतमित्यनेनैवोन्नेयं धृतमहि
म दिव्यं तव वपुः ॥ १७ ॥ रथः क्षोणी यन्ता शतधृतिरगेन्द्रो धनुरथो
रथाङ्गे चन्द्रार्कौ रथचरणपाणिः शर इति ॥ दिधक्षोस्ते कोऽयं
त्रिपुरतृणमाडम्बरविधिर्विधेयैः क्रीडन्त्यो न खलु परतन्त्राः ॥ ५ ॥
॥ ५ ॥ प्रभुधियः ॥ १८ ॥ हरिस्ते साहस्रं कमलबलिमाधाय पदयोर्य
देकोने तस्मिन्निजमुदहरन्नेत्रकमलम् ॥ गतो भक्त्युद्रेकः परि
२ णतिमसौ चक्रवपुषा त्रयाणां रक्षायै त्रिपुरहर जागर्ति जग
ताम् ॥ १९ ॥ क्रतौ सुप्ते जाग्रत्त्वमसि फलयोगे क्रतुमतां

सोघ्निनयनानिमेषं संहृतवान्:॥ तत्फल्गुमाषः करोतु तव नेक
लेन श्रियमहोविकारोऽपि श्लाघ्यो भुवनभयभंगव्यसनि
नः॥१४॥ अभिसत्त्वपर्णा नेयं कश्चिदपि सुरेवासुरनरे निवर्त्ति
तो नित्यं जगति जयिनो यस्य विशिखाः॥ स एव त्वन्नीथा
लोमिनरसुरसाधारणामभूत्स्मरः स्मर्तव्यात्मानं हि
त्रिष्टुप्छन्दः परिभवः॥१५॥ महीपालाद्याता व्रजति सहसा सं
श्रयपदं पदं विस्तीर्णान्यप्भुजपरिक्षेत्राणाम् ॥मु
यौ दौस्थ्यं यात्यनिभृतजठं नाडि नाउजगद्रक्षोपे
लं न तसि ननु वामेव विभुता॥१६॥ विपद्यापि नारोगतागु

मपि। यदि स्त्रैणं देवी यमनिरत देहार्द्धघटनात् अवैति त्वामद्धा
बत वरद मुग्धा युवतयः ॥२३॥ श्मशानेष्वाक्रीडा स्मरहर पिशा
चाः सहचराश्चिताभस्मालेपः स्रगपि नृकरोटीपरिकरः।
अमङ्गल्यं शीलं तव भवतु नामैवमखिलं तथापि स्मर्तॄणां
॥५॥ वरद परमं मङ्गलमसि ॥२४॥ मनः प्रत्यक्चित्ते सविधमव ॥५॥
धायात्तमरुतः प्रहृष्यद्रोमाणः प्रमदसलिलोत्सङ्गितदृशः।
3 यदालोक्याह्लादं ह्रद इव निमज्यामृतमये दधत्यन्तस्तत्त्वं
किमपि यमिनस्तत्किल भवान् ॥२५॥ त्वमर्कस्त्वं सोमस्त्व
मसि पवनस्त्वं हुतवहस्त्वमापस्त्वं व्योम त्वमु धरणिरा

क्व कर्म प्रध्वस्तं फलति पुरुषाराधनमृते ॥ अतस्त्वां संप्रेक्ष्य क्रतुषु फ
लदानप्रतिभुवं श्रुतौ श्रद्धां बध्वा दृढपरिकरः कर्मसु जनः ॥२०॥
क्रियादक्षो दक्षः क्रतुपतिरधीशस्तनुभृतामृषीणामार्त्विज्यं श
रणद सदस्याः सुरगणाः ॥ क्रतुभ्रंशस्त्वत्तः क्रतुफलविधानव्य
सनिनो ध्रुवं कर्तुः श्रद्धाविधुरमभिचाराय हि मखाः ॥२१॥ प्रजा
नाथं नाथ प्रसभमभिकं स्वां दुहितरं गतं रोहिद्भूतां रिरमयिषुमृ
ष्यस्य वपुषा ॥ धनुःपाणेर्यातं दिवमपि सपत्राकृतममुं त्रसन्तं
तेऽद्यापि त्यजति न मृगव्याधरभसः ॥२२॥ स्वलावण्याशंसा
धृतधनुषमह्नाय तृणवत्पुरः प्लुष्टं दृष्ट्वा पुरमथन पुष्पायुध

ष्ठाय च नमो नमः क्षोदिष्ठाय स्मरहर महिष्ठाय च नमः ॥ नमो
वर्षिष्ठाय त्रिनयन यविष्ठाय च नमो नमः सर्वस्मै ते तदिद
मिति सर्वाय च नमः ॥२९॥ बहलरजसे विश्वोत्पत्तौ भवाय
नमो नमः प्रबलतमसे तत्संहारे हराय नमो नमः । जनसुख
कृते सत्त्वोद्रिक्तौ मृडाय नमो नमः प्रमहसि पदे निस्त्रैगुण्ये
शिवाय नमो नमः ॥३०॥ कृशपरिणति चेतः क्लेशवश्यं
क्व चेदं क्व च तव गुणसीमोल्लंघिनी शश्वदृद्धिः ॥ इति
चकितममन्दीकृत्य मां भक्तिराधाद्वरद चरणयोस्ते वा
क्यपुष्पोपहारम् ॥३१॥ असितगिरिसमं स्यात्कज्जलं

स्मात्व मिति च ॥ परिछिन्नामेवं त्वयि परिणाता विभ्रतु गिरं
न विद्मस्तत्तत्त्वं वयमिह हि यत्त्वं न भवसि ॥२६॥ त्रयीं तिस्रो
वृत्तीस्त्रिभुवनमथो त्रीनपि सुरानकाराद्यैर्वर्णैस्त्रिभिर
भिदधत्तीर्णविकृति ॥ तुरीयं ते धाम ध्वनिभिरवरुंधान
मणुभिः समस्तं व्यस्तं त्वां शरणद गृणात्योमिति पदम्
5 ॥२७॥ भवः शर्वो रुद्रः पशुपतिरथोग्रः सहमहांस्तथा भी
मेशानाविति यदभिधानाष्टकमिदम् । अमुष्मिन्प्रत्ये
कं प्रविचरति देव श्रुतिरपि प्रियायास्मै धाम्ने प्रणिहितन
मस्योऽस्मि भवते ॥२८॥ नमो नेदिष्ठाय प्रियदव दविष्ठा